International Journal of Applied Research 2018; 4(3): 543-544




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2018; 4(3): 543-544
www.allresearchjournal.com
Received: 21-01-2018
Accepted: 26-02-2018

**डॉ0 उमेश कुमार मंडल**
श्री बालेश्वर मंडल, गंगाराही, रजौर
रामभद्रपुर, ईलमासनगर, समस्तीपुर
बिहार, भारत

**Corresponding Author:**
**डॉ0 उमेश कुमार मंडल**
श्री बालेश्वर मंडल, गंगाराही, रजौर
रामभद्रपुर, ईलमासनगर, समस्तीपुर
बिहार, भारत

# वाल्मीकिरामायणस्य उपजिव्यत्वम्

**डॉ0 उमेश कुमार मंडल**

## सारांश

''मा निषद् प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्।। [1]

आदिकवि–प्राचेतस–महर्षिवाल्मीकिना विरचितमादिकाव्यं रामायणम् विद्वज्जनमानसोल्लासं विद्याधनम् । आम्नायादन्यत्र नूतनं छन्दसामवतरणं जगतिं प्रकाशते। तपः स्वाध्याय परिपूतात्मा ब्रह्मर्षि–वाल्मीकिदेवर्षि–नारदमुखात् सकलगुणनिधानस्य मर्यादापुरूषोत्तम–श्रीरामभद्रस्य चारित्रिक–वैशिष्ट्यं समाकर्ण्य तद्वर्णने दत्तावधानो बभूव। एकदा माध्यन्दिन् स वनाय तमसानदीमनुप्राप्तः। तत्र एकेन क्रूरव्याधेन वध्यमानं क्रौञ्चम्, तत्पार्श्वे तत्सहचरीम्। प्रिय–विरह–शोकेन विलयन्ती मुहर्मुहर्भूमौ लुठन्तीं विलोक्य करूणार्द्रचेताः प्राचेतसमहर्षिरत्यन्त–शोकाकुलोऽभवत्। करूणावरूणालयस्य ब्रह्मर्षरन्तः करणान्तर्गत–शोकोच्छ्वासः तन्मुखादकस्मात् देवीवाग्रूपेण परिणतः आनुष्टुपेन छन्दसा। एवं हि आनायास–श्लोक–व्याहरणात्–''किमिदं–व्याहृतम्'' इति। चिन्ताकुलचेतामहर्षिर्व्याजहार पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः। यथा–

शाकोर्त्तस्य प्रवृत्ते मे श्लोके भवतु नान्यथा।''[2]

इति एवं चिन्तयन्तं किंकर्तव्यविमूढ़ं महर्षिमुपसंगम्यभूतभावनः पद्मयोनित्रेह्मा प्रावोचत्त्रृषे, प्रबुद्धोऽसि वागात्मनि ब्रह्मणि। तद् ब्रूहि रामचरितम्। अव्याहृत –ज्योतिराषं ते चक्षुः प्रतिभातु। आद्यः कविरसि[3] एवमुक्त्वाऽन्तर्हिते ब्रह्मणि समाहितमना महर्षि प्राचेतसः मनुष्येषु सर्वप्रथमं शब्दब्राह्मणस्तादृशं विवर्तमितिहासं रामायणं विरचयाञ्चकार। एवं हि महर्षि–वाल्मीकि –प्रणीतं रामायणमिदम्। कुशलवाक्यां तन्त्री–लय–संवीत गीतं सीतमस्ति। पुरातनमपि क्षणे–क्षणे नवनवायमानं रमणीयताया अपूर्वं रूपमस्ति। अपृथगयत्न–निर्वत्यैः रसध्वनि–प्रकर्षोत्कर्षकैः शब्दार्थालंकारैर्विभूषितम्, माधुर्योजः प्रसादाद्यैगुणैर्गुम्फितम्, रम्यरीति–सद्वृत्ति–विभ्राजितम्, अपूर्वनिर्माणकौशलेन कमनीयम्, सचेतश्चेतश्चमत्कारि–चारूरचना–वैचित्र्येण रमणीयम्, स्वविषयमाधुर्येण परमास्वाद्यम्, चारूरचना–वैचित्र्येण रमणीयम्, स्वविषय–माधुर्येण परमास्वाद्यम्, सहृदयं–हृदयाह्लादकम्, विश्वविश्रुतमादि– महाकाव्यं सर्वत्र विजयतेतराम्।

### वाल्मीकिरामायणस्य आदिकाव्यत्वम्,काव्यान्तरबीजत्वं च–

इदं हि रामायणमादिकवेर्वाल्मीकेरादिकाव्यमीति न केवलम् पूर्वोक्तेन ''क्रौञ्चद्वन्द्व–बियोगोत्थः शोकः श्लोकत्वमागतः'' इति प्रसगेंनैव निर्धार्यते, अपि तु महर्षि–व्यासः–प्रणीतैर्महाभारत–पुराणादिर्भिरपि निश्चीयते। काव्यान्तरस्य बीजरूपमेतदेव रामायणं समधीत्य महर्षि श्रीकृष्णद्वैपायनव्यासेन पुराणमहाभरतादीनि निरमयिषत इति प्रतिपादयति वृहद्धर्मपुराणम्–

पठ रामायणं व्यास, काव्य–बीजं सनातनम्।
यत्रा राम–चरित्रां स्यात् तदहं तत्रा भक्तिमान्।[4]

रामायणं पठित मे प्रसन्नोऽस्मिन कृतस्त्वया।
करिष्यामि पुराणानि महाभारतमेव च।।[5]

महर्षि–वाल्मीकेर्नामोल्लेखपुरस्सरम् रामायण–युद्धकाण्डस्य एकाशीतितमाध्यायस्य अष्टाविंशश्लोकः अविकलरूपेण उपन्यस्त उपलभ्यते।
अग्निपुराणे प चमाध्यायात् त्रायोदशाध्यायपर्यन्तम् नारद–वाल्मीकि– संवाद[7] निर्देश –पुरस्सरम् रामायणकथासारः संगृहीतः समुपलभ्यते।
महर्षिव्यासदेवेन स्कन्दपुराणे वैष्णवखण्डे वैशाखमहात्म्ये सप्तदशाध्यायतो विंशतितमाध्यायपर्यन्तम्, आवन्त्यखण्डे अवन्तीक्षेत्रामहात्म्ये चतुर्विंशाध्याये, प्रयासखण्डे अष्टसप्तत्यधिक–द्विशततमाध्याये च ब्रह्मर्षिवाल्मीकेर्जीवनवृत्तम् श्रद्धातिशयेन उपन्यस्तम्। अध्यात्मरामायणस्य अयोध्याकाण्डे षष्ठसर्गे तस्य पूर्वजन्मवृत्तान्तो विस्तरेण वर्णितः।
एवं विधानि अनेकानि उदाहरणानि रामायणस्य उपजीत्यत्वं प्रदर्शयन्ति।

**रामायणबालकाण्डे**

''समाक्षरैश्चतुर्भिर्यः पादैर्गीतो महर्षिणा।
सोऽनुव्याहारणाद् भूयः शोकः श्लोकत्वमागतः।।''[6]

**इति श्लोकमुपजीव्यैव समादरणपुरस्सरम् रघुवंशे महाकवि कालिदास**

तामभ्यगच्छद्रूदितानुकारी मुनिः कुशोध्मारहणाय यातः।
निषादविद्वाण्डज– दर्शनोत्थः श्लोकत्वमापद्यतयस्य शोकः।।

इति विरचया चकार। बौद्धजातकेषु अन्यतमं प्रसिद्धं दशरथजातकम्, न केवलं रामायणकथामेव वर्णयति अपि तु उत्तरकाण्डस्य एकं श्लोकं पालिभाषायां रूपान्तरितम् उद्धरति।
एव च रामायण–कथा–वर्णन–परायणः परवर्तिनो महाकवयः रामायण–रूपं सनातन बीजमेव पल्लवयन्ति, विकासयन्ति, प्रकाशयन्ति च।

**रामायणस्य संरचना**

सप्तकाण्डात्मकं रामायणमिति जगति सर्वत्रा प्रथितम्।
वाल्मीकिरामायणस्य सप्तकाण्डानि आधृत्यैव अध्यात्मरामायणे, रामचरितमानसादौ च तन्नामकान्येव सप्तकाण्डानि विलसन्ति। मूलरामायणे सप्तषु काण्डेषु प चशतसंख्याकाः सर्गाः, चतुर्विंशतिसहस्रमिताः श्लोका आसन्निति निर्दिशति। बालकाण्डस्य चतुर्थ–सर्गे–

प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवान् ऋषिः।
चकार चरितं कृत्स्नं विचित्रापदमर्थवत्।।
चतुर्विंशत् सहस्राणि श्लोकामानुक्तवानृषिः।
तथा सर्गशतान् प च षट् काण्डानि तथोत्तरम्।
कृत्वा तु तन्माप्राज्ञः सभविष्यं सहोत्तरम्।।
काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्।
पौलस्त्य–वघमित्येवं चकारं चरितं–व्रतः।
एतच्च कृत्सनं रामायणं वेदोपबृंहणार्थाय।।

महर्षि वेदेषु परिनिहिक्तौ मेधाविनौ अग्राह्यत। ततश्च गान्धर्वतत्वज्ञौ स्थान–मूर्च्छन–कोविदौ मधुर–स्वरौ तौ यमजौ भ्रातरौ–

पाठ्ये गेये च मधुरं प्रमाणैस्त्रिभि रन्वितम्।
जातिभिः सप्तभिर्युक्त तन्त्री–लय–समन्वितम्।
रसैः श्रृत्रर–करूण–हास्य–रौद्र–भयानकैः।
वीरादिभि रसैर्युक्तं काव्यमेतद्गायताम्।।

**बालकाण्डस्य प्रथमसर्गान्ते–**

एतदाख्यानमामुष्यं पठन् रामायणं नरः।
स पुत्रा–पौत्रा सगणः प्रत्य स्वर्गे महीयते।।
एवमेव उत्तरकाण्डस्यान्ते–
एतदाख्यानमायुष्य सभविष्यं सहोत्तरम्।
कृतवान् प्रचेतसः पुत्रास्तद्ब्रह्माप्यन्वमन्यत।।

इत्यनयोः श्लोकयोर्थकारो गायत्रयक्षरम्। एतच्च गायत्रयाश्च स्वरूपं तद् रामायणानुत्तमम् इत्येतेन सुस्पष्टम्।

**निष्कर्ष**

एव च संस्कृतसाहित्याकाशे वाल्मीकिरामायणकाव्यादारभ्य अधुना पर्यन्तं रचित काव्य–खण्डकाव्य–गीतिकाव्यादिना च प्रायः उपजीव्यत्वेन रामायणस्यस्यास्य स्थानं सर्वोपरि विद्यते। वालमीकिरामायणं अखिलविश्वे सर्वमान्यो प्रतिष्ठितश्च ग्रन्थो विद्यते।

**सन्दर्भ**


1. वाल्मीकिरामायणम्'–1/2/15।
2. तत्रौव–1/2/18।
3. तत्रौव–1/2/30।
4. बृहद्धर्मपुराणे,प्रथखण्डे–30/47,51।
5. तत्रौव–1/30/55।
6. रामायणे–1/2/40।